द्वादशः पाठः १२

# सुभाषितानि



**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ।।१।।**

**भावार्थः** – यः अभिवादनशीलः भवति अर्थात् अन्येषां नमस्कार–प्रणामादिभिः सदैव अभिवादनं करोति एवं नित्यं वृद्धानां सेवां करोति, तस्य जीवने एतेषां (१. आयुः २. विद्या ३. यशः ४. बलम्) चतुर्णां वृद्धिः भवति।


**उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।**
**षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ।।२।।**

**भावार्थः** – ईश्वरः अपि तस्य एव सहायतां करोति यः स्वयम् उद्यमशीलः (उद्योगी) साहसी, धैर्यवान्, बुद्धिमान्, शक्तियुक्तः पराक्रमी च भवति ।

**वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।**
**एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि सः ।।३ ।।**



**भावार्थः** – सहस्रशः तारागणाः मिलित्वा अपि यम् अन्धकारं नाशयितुम् असमर्थाः भवन्ति, तम् एव अन्धकारम् एकः चन्द्रः नाशयति। यथा– सहस्रशः तारागणानाम् अपेक्षया एकः चन्द्रः उत्तमः भवति, तथा एव शतशः मूर्खपुत्राणाम् अपेक्षया एकः गुणी पुत्रः उत्तमः भवति ।



**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।**
**वसन्तकाले सम्प्राप्ते काकः काकः पिकः पिकः ।।४ ।।**

**भावार्थः** – काकः अपि कृष्णवर्णीयः, पिकः (कोकिलः) अपि कृष्णवर्णीयः भवति ।रूपेण समानयोः एतयोः कोऽपि भेदः न दृश्यते, किन्तु यदा वसन्तकालः आगच्छति, तदा ज्ञायते यत् यः कर्कशध्वनिं करोति, सः काकः ।यः मधुरध्वनिं करोति, सः पिकः ।

**विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।**
**स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ।।५।।**

**भावार्थः** – विद्वत्ता नृपता च कदापि समाने न भवतः यतोहि राजा (नृपः) तु केवलं स्वराज्ये एव पूजितो भवति, किन्तु विद्वान् सर्वत्र पूजितो भवति ।अतः विद्वत्ता एव श्रेष्ठा ।

**यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।**
**लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ।।६।।**

**भावार्थः** – यस्य पार्श्वे प्रज्ञा अर्थात् बुद्धिः नास्ति, शास्त्रम् तस्य किमपि साहाय्यं कर्तुं न शक्नोति ; यथा नेत्रहीनं जनं दर्पणः रूपं दर्शयितुं न शक्नोति ।

**हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।**
**श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ।।७।।**

**भावार्थः** – गुणाः एव शरीरस्य शोभां वर्धयन्ति, अतः गुणाः एव आभूषणानि । यथा – हस्तस्य आभूषणं दानं भवति, कण्ठस्य आभूषणं सत्यभाषणं भवति, कर्णस्य आभूषणं शास्त्रश्रवणं भवति । एतानि आभूषणानि यस्य पार्श्वे भवन्ति, तस्य कृते स्वर्णादिभिः निर्मितानाम् आभूषणानां काऽपि आवश्यकता न भवति ।

**अधमाः धनमिच्छन्ति धनं मानं च मध्यमाः ।**
**उत्तमाः मानमिच्छन्ति मानो हि महतां धनम् ।।८।।**

**भावार्थः** – संसारे त्रिविधाः जनाः भवन्ति – अधमाः मध्यमाः उत्तमाः च । अधमजनाः केवलं धनम् इच्छन्ति, मध्यमजनाः धनं सम्मानं च इच्छन्ति । उत्तमजनाः केवलं सम्मानम् इच्छन्ति, अतः सम्मानः एव

**काकचेष्टो बकध्यानः श्वाननिद्रस्तथैव च ।**
**अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः ।।९।।**



**भावार्थः** – श्रेष्ठविद्यार्थिनः पञ्च लक्षणानि भवन्ति – १. सः सफलतां प्राप्तुं काकः इव चेष्टां करोति। २. सः लक्ष्यस्य उपरि बकः इव ध्यानं करोति। ३. सः शुनकः इव सावधानः भूत्वा निद्रां करोति। ४. सः अल्पम् आहारं करोति। ५. सः अध्ययनार्थं गृहत्यागं करोति।

**अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।**
**अधनस्य कुतो मित्रम् अमित्रस्य कुतः सुखम् ।।१०।।**

**भावार्थः** – यः आलस्यं करोति, सः विद्यां प्राप्तुं न शक्नोति । यस्य पार्श्वे विद्या न भवति, सः धनं प्राप्तुं न शक्नोति। यस्य पार्श्वे धनं न भवति, तस्य कोऽपि जनः मित्रं न भवति । मित्ररहितः जनः कदापि सुखं न प्राप्नोति । अतः आलस्यस्य त्यागः करणीयः।

**अध्यापकाय निर्देशः –**

। शिक्षकः कक्षायां सुभाषितानामोच्चारणं कारयन्तु येन विद्यार्थिनः कण्ठस्थीकृत्य श्रावयितुं समर्थाः भविष्यन्ति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| अभिवादनशीलस्य | नमस्कारादिस्वभावयुक्तस्य | नमस्कारादि अभिवादन करने वाले का |
| नित्यम् | सदा | हमेशा |
| वृद्धोपसेविनः | वृद्धजनानां सेवकस्य | वृद्धों (बुजुर्गों) की सेवा करने वाला |
| वर्धन्ते | वृद्धिं प्राप्नुवन्ति | बढ़ते हैं |
| यशः | कीर्तिः | प्रसिद्धि |
| बलम् | शक्तिः | ताकत |
| उद्यमः | उद्योगः | परिश्रम |
| वरमेको | एकः श्रेष्ठः | एक श्रेष्ठ (है) |
| शतान्यपि | शतसंख्याकाः अपि | सैकड़ों भी |
| तमः | अन्धकारम् | अन्धकार |
| हन्ति | नाशयति | नष्ट करता है |
| तारागणाः | नक्षत्र समूहाः | तारों का समूह |
| काकः | वायसः | कौआ |
| कृष्णः | श्यामवर्णीयः | काला |
| पिकः | कोकिलः | कोयल |
| भेदः | भिन्नता | अन्तर |
| विद्वत्वम् | विद्वत्ता | विद्वत्ता |
| नृपत्वम् | नृपता | शासकता |
| तुल्यम् | समानम् | समान |
| कदाचन | कदाचित् | कभी |
| सर्वत्र | सर्वेषु स्थानेषु | सभी जगह |
| प्रज्ञा | बुद्धिः | बुद्धि |
| लोचनाभ्याम् | नेत्राभ्याम् | आँखों से |
| विहीनस्य | रहितस्य | रहित का |
| श्रोत्रस्य | कर्णस्य | कान का |
| अधमाः | नीचाः | नीच व्यक्ति |
| मानम् | सम्मानम् | सम्मान |
| महताम् | श्रेष्ठाणां | श्रेष्ठ |
| काकचेष्टाः | काक इव प्रयत्नशीलः | कौए जैसा प्रयत्न वाला |
| बकध्यानः | बक इव ध्यानशीलः | बगुले जैसा ध्यान वाला |
| श्वाननिद्रः | कुक्कुर इव निद्राशीलः | कुत्ते जैसी नींद वाला |

## अभ्यासः

**१. उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| अभिवादनशीलस्य | वृद्धोपसेविनः | आयुर्विद्यायशोबलम् | मूर्खशतान्यपि |
| एकश्चन्द्रस्तमो | सम्प्राप्ते | विद्वत्वम् | नृपत्वम् |
| प्रज्ञा | लोचनाभ्याम् | श्रोत्रस्य | श्वाननिद्रस्तथैव। |

**२. उचित-उत्तरस्य क्रमाक्षरं कोष्ठके लिखत –**

(अ) अभिवादनशीलस्य चतुर्षु किं न वर्धते –

(क) आयुः (ख) विद्या

(ग) यशः (घ) साहसम् ( )

(आ) मानः धनम् अस्ति –

(क) अधमानाम् (ख) उत्तमानाम्

(ग) मध्यमानाम् (घ) सर्वेषाम् ( )

(इ) सत्यं भूषणम् अस्ति –

(क) हस्तस्य (ख) नेत्रस्य

(ग) कण्ठस्य (घ) श्रोत्रस्य ( )

**३. एकेन पदेन उत्तरत –**

(क) विद्वान् कुत्र पूज्यते ?

(ख) काक – पिकयोः भेदः कदा ज्ञायते ?

(ग) हस्तस्य भूषणं किम् ?

(घ) के मानम् एव इच्छन्ति ?

(ङ) विद्यार्थिनः कति लक्षणानि ?

**४. परस्परं सुमेलयत –**

| | |
|---|---|
| उद्यमः साहसं धैर्यं | न च मूर्खशतान्यपि |
| वरमेको गुणी पुत्रो | अमित्रस्य कुतः सुखम् |
| लोचनाभ्यां विहीनस्य | बुद्धिः शक्तिः पराक्रमः |
| अधनस्य कुतो मित्रम् | दर्पणः किं करिष्यति |

**५. रेखाङ्कितपदानाम् अशुद्धिसंशोधनं कृत्वा शुद्धं वाक्यं लिखत -**

(क) काकः कृष्णः पिकः कृष्णं भवति ।

..................................................

(ख) लोचनाभ्यां विहिनात् दर्पणः किं करिष्यति ?

..................................................

(ग) श्रोत्रं भूषणं शास्त्रं भवति ।

..................................................

(घ) अधमः धनमिच्छन्ति ।

..................................................

**६. अधोलिखितानां पदानां विभक्तिं वचनं च लिखत -**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा - | हस्तस्य | षष्ठी | एकवचनम् |
| (क) | उद्यमः | ........................ | ........................ |
| (ख) | धनम् | ........................ | ........................ |
| (ग) | कण्ठस्य | ........................ | ........................ |
| (घ) | विद्या | ........................ | ........................ |
| (ङ) | मानम् | ........................ | ........................ |
| (च) | तारागणाः | ........................ | ........................ |
| (छ) | काकयोः | ........................ | ........................ |

## योग्यता-विस्तारः

१. प्रियाः छात्राः ! यूयं अस्मिन् पाठे नीतिपूर्णान् दश श्लोकान् पठितवन्तः । संस्कृतसाहित्ये एतादृशानां नीतियुक्तानां श्लोकानाम् अतुल्यभण्डारः अस्ति । तेषाम् अन्वेषणेन अभ्यासेन च युष्माकं ज्ञाने योग्यतायां च वृद्धिः भविष्यति । अतः अधिकाधिकश्लोकानां सङ्ग्रहणाय प्रयासं कुरुत ।

२. **केचन अन्य-श्लोकाः अत्र दीयन्ते, एतान् अपि पठत -**

१. षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ।।

२. वृत्तं यत्नेन संरक्षेत्, वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणः, वृत्ततस्तु हतो हतः ।।

३. न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचित् रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ।।

३. **अपरस्य श्लोकद्वयस्य सङ्ग्रहं कृत्वा अत्र लिखत -**

१. ..........................................................................
..........................................................................

२. ..........................................................................
..........................................................................

४. **एतत् अपि कुरुत -**

यूयं श्लोकान् स्मृत्वा कर्गदफलकेषु लिखित्वा विद्यालयस्य भित्तिषु स्थापयत।